# Mahodara Stuti by Surarshi

# મહોદરસ્તુતિઃ સુરર્ષિભિઃ કૃતા

## Document Information

Text title : Mahodara Stuti by Surarshi

File name : mahodarastutiHsurarShibhiHkRRitA.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : Ajit Krishnan

Proofread by : Ajit Krishnan, PSA Easwaran

Description/comments : Mudgalapurana, Khanda 3, Adhyaya 11

Latest update : April 23, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# Mahodara Stuti by Surarshi

# મહોદરસ્તુતિઃ સુરર્ષિભિઃ કૃતા

રવિરુવાચ -
ગતે મોહાસુરે તત્ર શાન્તરૂપે સુરેશ્વરાઃ ।
સુરૈશ્ચ મુનિભિઃ સાર્ધં મહોદરમપૂજયન્ ॥ ૧॥

પૂજયિત્વા ગણેશાનં પ્રણતા ભક્તિસંયુતાઃ ।
તુષ્ટુવુસ્તે વિશેષેણ હર્ષયુક્તાઃ સુરર્ષયઃ ॥ ૨॥

સુરર્ષય ઊચુઃ ।
અમેયમાયાઽમિતવિક્રમાય નિરઞ્જનાયાથ ગણેશ્વરાય ।
અમાયિને માયિકમોહનાય નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૩॥

મનોવચોહીનતયા સ્થિતાય મનોવચોયુક્તગજાનનાય ।
અયોગસંયોગમયાય ઢુણ્ઢે નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૪॥

વિદેહરૂપાય ચ બોધકાય તથા હિ સોઽહં પદભોગકાય ।
સદા સુબિન્દ્વાત્મકદેહગાય નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૫॥

ગુણેશરૂપાય સુષુપ્તિકાય તથા સુસૂક્ષ્માય ચ જાગૃતે તે ।
હરીશબ્રહ્માદિષુ સંસ્થિતાય નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૬॥

શુભાશુભાકારધરાય ભૂમ્ને શુભાશુભાદૌ ચ સુપૂજિતાય ।
શુભાશુભે કર્મણિ સિદ્ધિદાય નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૭॥

કર્ત્રે સુપાત્રે હરણાય કાલ! પ્રકાશરૂપાય ચ ભાવને તે ।
ક્રિયાસ્વરૂપાય ચ શક્તિદાય નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૮॥

યમાય ચન્દ્રાય ચ વાયવે વૈ કુબેરરૂપાય પુરન્દરાય ।
શિવાય વહ્ન્યાત્મકનૈરૃતાય નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૯॥

અનન્તરૂપાય જલેશકાય પ્રજાપતે! રૂપધરાય પાશિન્! ।
દિગીશપાલાય દિશામયાય નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૧૦॥

સુરાસુરાણાં ચ સમાય નિત્યં સુરાસુરાકારધરાય ધાત્રે ।
પિશાચગન્ધર્વમયાય યક્ષ! નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૧૧॥

ધરાસ્વરૂપાય જલપ્રકાશ! જલસ્વરૂપાય ચ તેજસે તે ।
વાતાય ચાકાશમયાય ધામ્ને નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૧૨॥

અનાદિમધ્યાન્તવિહારકાય સદાદિમધ્યાન્તમયાય ચિત્રમ્ ।
તત્ત્વપ્રકાશાય ચ તત્ત્વમૂર્તે નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૧૩॥

નરાય વર્ણાશ્રમસંસ્થિતાય દ્વિજસ્વરૂપાય નરાધિપાય ।
વૈશ્યાય શૂદ્રાય તથાઽન્તિમાય નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૧૪॥

ગુરોરધીનાય ગૃહસ્થરૂપ! વનસ્થિતાયાઽથ પરિવ્રજાય ।
વર્ણાશ્રમૈર્હીનમયાય યોગિન્! નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૧૫॥

વૃક્ષાદિવીરુધ્તૃણસંસ્થિતાય ધરાધરાકારમયાય દેવ! ।
પશુસ્વરૂપાય ચ પક્ષિણે તે નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૧૬॥

રસસ્વરૂપાય રસાધિપાય તથાઽન્નરૂપાય ચ જીવનાય ।
ચરાચરાકારમયાય નાગ! નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૧૭॥

વરાઙ્કુશાદ્યૈશ્ચ સુચિહ્નિતાયોન્દુરુધ્વજાયાઽઽખુસુવાહનાય ।
ત્રિનેત્રધારાય ચ શૂર્પકર્ણ! નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૧૮॥

સ્વાનન્દલોકાધિપ! દેવદેવ! સુસિદ્ધિબુદ્ધિપ્રભવે પરાત્મન્! ।
સદૈકદન્તાય ચતુર્ભુજાય નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૧૯॥

મહોદરાયાદિસુપૂજિતાય સુવસ્ત્રસમ્ભૂષણભૂષિતાય ।
પ્રમોદમોદાદિગણૈઃ સ્તુતાય નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૨૦॥

સદામૃતાભેદમયેક્ષુનીરસમુદ્રલીલાકરકઞ્જપાણે! ।
ગણેશ! હેરમ્બ! ચ ભક્તપોષ! નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૨૧॥

પ્રવિશ્ય વિશ્વોદરમેવ ભોગવિહારિણે વિશ્વમયાય પૂર્ણ! ।
વિકારહીનાય સુબોધદાય નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૨૨॥

અલ્પોદરા દેવમુખાશ્ચ સર્વે સ્વસ્વપ્રભોગે કુશલાશ્ચ તેન ।
તેષુ ત્વમેવ સુખભોગકારિન્ નમો નમસ્તેઽસ્તુ મહોદરાય ॥ ૨૩॥

યઃ પઠેચ્છૃણુયાદ્યશ્ચ તસ્મૈ શાન્તિપ્રદાયકમ્ ।
ભુક્તિમુક્તિપ્રદં ચૈવ ભવિષ્યતિ ન સંશયઃ ॥ ૩૮॥

ઇતિ સુરર્ષિભિઃ પ્રોક્તા મહોદરસ્તુતિઃ સમાપ્તા । ૩.૧૧

Encoded by Ajit Krishnan
Proofread by Ajit Krishnan, PSA Easwaran

*Mahodara Stuti by Surarshi*
pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*